दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-193 | 1 | मई 06, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ ग्रीष्म-ऋतुः
सूर्यः उत्तरायणम् ज्येष्ठकृष्णपञ्चमी
बैशाख 23 प्रविष्ठांशः मङ्गलमयः भवेत्

2 सर्वकारेण सर्वोच्चन्यायालये न्यायाधीशानां संख्या 33 तः वर्धयित्वा 37 कृता

3 ५१ नगरीय-निकायेषु १३१४ प्रत्याशिनः निर्वाचन-क्षेत्रे, ३२ नामाङ्कनानि निरस्तानि

4 तमिलनाडु-राज्ये 'टी.वी.के.' (TVK) पक्षस्य सर्वकार-निर्माणस्य सज्जता; विजयः सप्तम-दिनाङ्के मुख्यमन्त्रीरूपेण शपथं ग्रहीष्यति

# विधानसभा-निर्वाचनस्य परिणामानां घोषणानन्तरं पश्चिमबङ्ग, तमिलनाडु, केरलम-प्रदेशेषु च सर्वकारस्य निर्माणार्थ राजनैतिकक्रियाकलापानि आरभन्ते



विधानसभानिर्वाचनानां परिणामानां घोषणायाः अनन्तरं तमिलनाडु-केरलम-राज्ययोः सर्वकारस्य निर्माणार्थं राजनैतिक-प्रक्रियाः आरब्धाः सन्ति। तमिलनाडु-राज्ये अभिनेतृतः राजनेतारूपेण परिवर्तितः सी. जोसेफ विजयस्य तमिलगा-वेट्टी-कझगम् (टी. वी. के.) इत्यनेन दलेन अष्टोत्तरैकशतासनानि जित्वा राज्ये बृहत्तमदलत्वेन उद्भूतम् अस्ति। दलस्य निर्वाचने प्रबलप्रदर्शनस्य अनन्तरं, नवनिर्वाचिताः टी. वी. केति दलस्य विधायकाः चेन्नई-नगरस्य समीपे पनायूरे दलस्य मुख्यालये उपवेशने श्रीविजयाय औपचारिकरूपेण स्वनेतारूपेण चितवन्तः। पूर्वमुख्यमन्त्री एम. के. स्टालिन् इत्येषः राज्यपालाय स्व त्यागपत्रं समर्पितवान्।

## केरल-राज्ये काङ्ग्रेस-नेतृत्वे यू.डी.एफ. दलसमूहः सर्वकार-निर्माणाय अनौपचारिक-चर्चा कुर्वन् अस्ति।

केरल-राज्ये काङ्ग्रेस-नेतृत्वे यू.डी.एफ. दलसमूहः सर्वकार-निर्माणाय अनौपचारिक-चर्चा कुर्वन् अस्ति। केरलस्य चत्वारिंशदधिकैकशत विधानसभा क्षेत्रेषु द्वाधिकैकशत-क्षेत्रेषु अद्भुतं विजयं प्राप्य काङ्ग्रेस-नेतृत्वे यू.डी.एफ. दलसमूहः विधायक-दलस्य सभायाः अनन्तरं मन्त्रिमण्डलस्य निर्माणार्थ राज्यपालेन सह मेलनं करिष्यति।

## केन्द्रीयमन्त्री च अमितशाहः

## पश्चिमबङ्गालराज्ये केन्द्रीयमन्त्री जे.पी. नड्डाः असम-राज्ये च पर्यवेक्षकः नियुक्तः

हिमसंस्कृतवार्ता। भाजपेति दलेन दलस्य वरिष्ठनेता केन्द्रीयमन्त्री च अमितशाहः पश्चिमबङ्गालराज्ये विधायकानाम् उपवेशने विधायकदलप्रमुखस्य निर्वाचनाय केन्द्रीय-पर्यवेक्षकरूपेण नियुक्तः। ओडिशाराज्यस्य मुख्यमन्त्री मोहनचरण माझी राज्यस्य केन्द्रीयसह-पर्यवेक्षकरूपेण नियुक्तः अस्ति। केन्द्रीयमन्त्री जे.पी. नड्डाः असम-राज्ये विधायक दलस्य नेतृत्व- निर्वाचनाय केन्द्रीय पर्यवेक्षकरूपेण नियुक्तः अस्ति। हरियाणा-राज्यस्य मुख्यमन्त्री नायब सिद्धू सैनी राज्यस्य केन्द्रीय-सह-पर्यवेक्षकरूपेण नियुक्तः अस्ति। एतानि नामानि भाजपा-संसदीय-केन्द्रीय-पर्यवेक्षक-मण्डलेन अनुमोदितानि सन्ति ।

## सुभाषितम्

**पञ्चमेऽहनि षष्ठे वा,**
**शाकं पचते स्वे गृहे।**
**अनृणी चाऽप्रवासी च,**
**स वारिचर मोदते।।**

भावार्थः- जिस व्यक्ति के घर में यद्यपि प्रत्येक पांचवे या छठे दिन (निर्धनता के कारण) केवल शाक ही भोजन के रूप में पकता हो, परन्तु उसके ऊपर यदि कोई ऋण न हो तथा न वह परदेस में निवास करता हो तो ऐसा व्यक्ति जल में निवास करने वाले प्राणियों के समान संतुष्ट और प्रसन्न रहता है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यावाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

# बिहारराज्ये मई मासस्य सप्तमे दिनाङ्के महत्त्वपूर्णः विस्तारः भविष्यति



मुख्यमन्त्री सम्राट् चौधरी इत्यस्य नेतृत्वे बिहारराज्यस्य मन्त्रिमण्डलस्य मई मासस्य सप्तमे दिनाङ्के महत्त्वपूर्णः विस्तारः भविष्यति। भाजपेतिदलस्य राज्य-अध्यक्षः सञ्जय सरावगिः अवदत् यत् शपथग्रहणसमारोहे प्रधानमन्त्री नरेन्द्रमोदी, केन्द्रीय-गृहमन्त्री अमितशाहः, भाजपा-पक्षस्य अध्यक्षः नितिन नवीनः, जनता दल-यू-पक्षस्य अध्यक्षः नितीशकुमारः, एन्.डी.ए-दलसमूहस्य अन्ये वरिष्ठनेतारोऽपि उपस्थिताः भविष्यन्ति ।श्रीसरावगी अवदत् यत् गान्धी-मैदान् इतीदं स्थानं समारोहस्य स्थलरूपेण चितम् अस्ति। कार्यक्रमस्य सज्जता पूर्वमेव प्रचलिता अस्ति। सहैव गान्धी-मैदान इत्यत्र सार्वजनिकप्रवेशः प्रतिबन्धितः अस्ति।

# नरेन्द्रमोदिना यू.ए.ई.-देशस्य पुजैराहू-क्षेत्रोपरि कृताक्रमणस्य दृढतया निन्दा कृता



हिमसंस्कृतवार्ता। प्रधानमन्त्रिणा नरेन्द्रमोदिना यू.ए.ई.-देशस्य पुजैराहू-क्षेत्रोपरि कृताक्रमणस्य दृढतया निन्दा कृता। सामाजिक-प्रसार माध्यमे श्रीमोदी अवदत् यत् नागरिकाणां मूलसौकर्याणि लक्ष्यीकृत्य कृताक्रमणात्मकं कार्यम् अस्वीकार्यम् इति। सः दृढीकृतवान् यत् भारतं यू.ए.ई. इत्यनेन सह दृढतया ऐक्यं स्थापयति सहैव हि संवादस्य कूटनीतेश्च माध्यमेन सर्वासां समस्यानां शान्तियुतसमाधानाय स्वसमर्थनं पुनरुद्घाटयतीति। श्रीमोदी अधोरेखितवान् यत् होर्मुज़-जलसंध्याः माध्यमेन सुरक्षितं निर्विघ्नं च नौचालनं, क्षेत्रीयशान्त्यर्थ, स्थिरतायै, वैश्विक-ऊर्जा-सुरक्षायै च महत्त्वपूर्णम् अस्ति। ईरान्-देशस्य ड्रोन-आक्रमणानन्तरं यू.ए.ई. देशस्य पुजैराहू-पेट्रोलियम-इण्डस्ट्रीस्-जोन् इत्यत्र अग्निप्रकोपात् ह्यः त्रयः भारतीयाः नागरिकाः व्रणिताः अभवन्। पूर्वं विदेशमन्त्रालयः अपि यू.ए.ई. इत्यत्र आक्रमणस्य निन्दाम् अकरोत्, तत् अस्वीकार्यञ्च इति अवोचत्। मन्त्रालयः एकस्मिन् वक्तव्ये शत्रुतायाः तत्क्षणसमाप्तेः आवाहनम् अकरोत्, नागरिकसंरचनायाः नाशेन सह निष्पापनागरिकाणाञ्च लक्ष्यीकरणस्य निन्दाम् अकरोत्।

# पञ्जाब-राज्ये आप-नेतृत्वे प्रशासनेन राज्यतन्त्रस्य कथितस्य दुरुपयोगस्य विषये सांसदः राघव चड्डा राष्ट्रपतिना सह अमिलत्

हिमसंस्कृतवार्ता। भाजपेति दलस्य सांसदाः राघव चड्डा, अशोक मित्तलः, सन्दीप पाठकः, राजेन्द्रगुप्तः च राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदी मुर्मु वर्यया सह मिलित्वा पञ्जाब-राज्ये आप-नेतृत्वे प्रशासनेन राज्यतन्त्रस्य कथितस्य दुरुपयोगस्य विषये चिन्तां प्रकटितवन्तः। वार्ताहरैः सह वार्तालापं कुर्वन्, राघव चड्डा इत्यनेन आप-नेतृत्वे पञ्जाब-सर्वकारः राज्यतन्त्रस्य उपयोगेन राज्यसभायाः सदस्यान् लक्ष्यीकरोति इति आरोपितवान्। अत्रान्तरे, पञ्जाब्-राज्यस्य मुख्यमन्त्री भगवन्त-मान इत्येषः अपि आप-दलस्य राज्यसभायाः सप्तसदस्यानां भाजपेति दले प्रवेश-विषये चर्चार्थं राष्ट्रपतिना द्रौपदी-मुर्मु वर्यया सह मिलितवान्। उपवेशनानन्तरम्, श्रीमानः आप-दलस्य सांसदानां विलयनम् असंवैधानिकम् इति उक्तवान्।



# केन्द्रीयमन्त्रिमण्डलेन 'कपास कान्ति' अनियानम् अन्याः महत्त्वपूर्णयोजनाश्च स्वीकृताः




केन्द्रीयमन्त्रिमण्डलेन भारतस्य कार्पासक्षेत्रे बाधाः, न्यूनीभवन्तीं वृद्धिं, गुणवत्ताविषयिणीः चिन्ताः च दूरीकर्तुं पञ्चसहस्र-षट्शत-एकोनषष्टि (5,659) कोटिरूप्यकाणां व्ययेन कार्पास-उत्पादकता-मिशनम् 'कपास कान्ति' इत्यस्मै अनुमतिः दत्ता। नवदेहल्यां एकां वार्ताहरसभां सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत् इदं मिशनं सर्वकारस्य '5-F' दर्शनस्य (क्षेत्रात् तन्तुं, तन्तुतः यन्त्रागारं, यन्त्रागारात् फॅशन-जगत्, फॅशन-जगतः विदेशं प्रति च) अनुरूपम् अस्ति। एतद् मिशनं कार्पासस्य उत्पादकतायाः वर्धने केन्द्रीभूतम् अस्ति। अनया योजनया प्रायः 32 लक्षं कार्पास-कृषकाः लाभान्विताः भविष्यन्ति इति आशा वर्तते। अनेन 2030-31 वर्षपर्यन्तं कार्पासस्य उत्पादनं वर्धित्वा 498 लक्षं पिण्डान् (bales) यावत् प्राप्तुं सम्भावना अस्ति। अस्मात् आयातित-कार्पासस्य उपरि निर्भरता न्यूना भविष्यति, विदेशीयमुद्रायाः रक्षणे च साहाय्यं मिलिष्यति।

### आपातकालीन-ऋण-प्रत्याभूति-योजना (ECLGS)

केन्द्रीयमन्त्रिमण्डलेन आपातकालीन-ऋण-प्रत्याभूति-योजनायाः पञ्चम-चरणाय अपि स्वीकृतिः दत्ता। अस्याः योजनायाः अन्तर्गतं सूक्ष्म-लघु-मध्यम-उद्यमेभ्यः (MSMEs) शतप्रतिशतं (100%) ऋणप्रत्याभूतिः प्रदास्यते, यदा तु अन्येभ्यः उद्यमेभ्यः विमानन-क्षेत्रेभ्यः च नवतिप्रतिशतं (90%) प्रत्याभूतिः दीयते।

### इक्षु-कृषकाणां कृते लाभः

मन्त्रिमण्डलेन 2026-27 शर्करा-र्तौ इक्षु-उत्पादनस्य कृते उचितं लाभप्रदं च मूल्यं (FRP) 365 रूप्यकाणि प्रति क्विन्टल इति निश्चितं कृतम्। इदं मूल्यं 10.25 प्रतिशतस्य मूल-वसूली-दरस्य उपरि आधारितम् अस्ति। श्रीवैष्णवः अवदत् यत् अनेन निर्णयेन प्रायः पञ्चकोटि-इक्षु-कृषकाः तथा च शर्करा-मिल-यन्त्रागारेषु कर्मरताः पञ्चलक्षं कर्मकराः लाभान्विताः भविष्यन्ति।

### सेमीकण्डक्टर-परियोजनाः

केन्द्रीयमन्त्रिमण्डलेन 'इण्डिया सेमीकण्डक्टर मिशन' इत्यस्य अन्तर्गतं द्वे अन्ये सेमीकण्डक्टर-परियोजने अपि स्वीकृतवती। एतयोः 'गैलियम नाइट्राइड' तन्त्रज्ञाने आधारिता देशस्य प्रथमा वाणिज्यिक-मिनी-माइक्रो-एलईडी-डिस्प्ले-सुविधा तथा च एका सेमीकण्डक्टर-पैकेजिंग-सुविधा सम्मिलिता अस्ति। श्रीवैष्णवः अवदत् यत् स्वीकृत-प्रस्तावैः गुजरात-राज्ये सेमीकण्डक्टर-निर्माण-घटकाः संस्थापयिष्यन्ते। सः अवदत् यत् एताभिः परियोजनाभिः प्रायः द्विसहस्र-द्विशत-त्रिंशत् (2,230) कुशल-वृत्तिमन्तः (professionals) कर्मकराः उद्योगानां कृते अवसराः प्राप्स्यन्ति।

# सर्वकारेण सर्वोच्चन्यायालये न्यायाधीशानां संख्या 33 तः वर्धयित्वा 37 कृता



केन्द्रीयमन्त्रिमण्डलेन संसदि सर्वोच्चन्यायालय (न्यायाधीशानां संख्या) संशोधनविधेयकम्, 2026 उपस्थापयितुं प्रस्तावाय अनुमतिः दत्ता। नवदेहल्यां केन्द्रीयमन्त्रिमण्डलस्य सभायाः अनन्तरं माध्यमैः सह भाषमाणः सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत् अस्य विधेयकस्य उद्देश्यं सर्वोच्चन्यायालय (न्यायाधीशानां संख्या) अधिनियम, 1956 मध्ये संशोधनं कृत्वा सर्वोच्चन्यायालये न्यायाधीशानां स्वीकृतां संख्यां वर्तमानात् 33 तः वर्धयित्वा 37 करणीयम् अस्ति, यस्मिन् भारतस्य मुख्यन्यायाधीशः सम्मिलितः नास्ति। न्यायाधीशानां संख्यायां वृद्ध्या सर्वोच्चन्यायालयः अधिककुशलतया प्रभावीरूपेण च कार्यं कर्तुं शक्ष्यति तथा च त्वरितन्यायं सुनिश्चितं करिष्यति।

# वियतनाम-देशस्य राष्ट्रपतिः 'तो लाम' महोदयः बिहारस्य महाबोधि-मन्दिरे अर्चनां कृतवान्



वियतनाम-देशस्य राष्ट्रपतिः तो लाम महोदयः गतदिने बिहारस्य बोधगयायां स्थितस्य विश्वप्रसिद्धस्य महाबोधि-मन्दिरस्य दर्शनं कृत्वा पूजा-अर्चनां कृतवान्। सः पवित्र-बोधि-वृक्षस्य अधः ध्यानं कृत्वा भगवते बुद्धाय श्रद्धाञ्जलिं समर्पितवान्। राष्ट्रपतिः तो लाम महोदयः बोधगयायां स्थितस्य वियतनामी-मठस्य अपि भ्रमणं कृतवान्। अत्र सः विविधासु धार्मिक-सांस्कृतिक-गतिविधिषु भागं गृहीतवान्। तस्य एषा यात्रा भारत-वियतनाम-देशयोः मध्ये धार्मिक-आध्यात्मिक-सम्बन्धान् सुदृढं कर्तुं दृष्ट्या अतीव महत्त्वपूर्णा मन्यते।
इतः पूर्वं, बोधगया-विमानपत्तने राज्यपालः लेफ्टिनेण्ट् जनरल (सेवानिवृत्तः) सैयद अता हसनैनः, मुख्यमन्त्री सम्राट चौधरी, उपमुख्यमन्त्री विजय कुमार सिन्हा च वियतनाम-राष्ट्रपतिं स्वागतं कृतवन्तः।

# प्रमुखरक्षाध्यक्षः देहल्यां 'ब्रेन-कंप्यूटर इण्टरफेस' सम्मेलनस्य उद्घाटनं कृतवान्




प्रमुखरक्षाध्यक्षः (CDS) जनरल अनिल चौहानः देहल्यां 'ब्रेन-कंप्यूटर इण्टरफेस (BCI): तन्त्रिकासम्बन्धि-सीमानां विस्तारः अस्य रणनीतिक-निहितार्थाश्च' इति विषयकस्य सम्मेलनस्य उद्घाटनं कृतवान्। इदं सम्मेलनं 'एकीकृत-रक्षा-स्टाफ-मुख्यालयेन' (HQ IDS) 'संयुक्त-युद्ध-अध्ययन-केन्द्रेण' (CENJOWS) च सहयोगेन आयोजितम् आसीत्। अस्मिन् सम्मेलने भविष्यस्य युद्धेषु बी.सी.आई. (BCI) इत्यस्य भूमिका, मानव-यन्त्र-एकीकरणं तथा च स्वदेशी-नवाचारस्य विषये चर्चा कृता।

# पेट्रोलियम-प्राकृतिकगैसमन्त्री हरदीपसिंहपुरी महोदयः जपान-देशस्य सासंदैः ताकायुकु कोबायाशी महोदयेन च सह मेलनं कृतवान्



पेट्रोलियम-प्राकृतिकगैसमन्त्री हरदीपसिंहपुरी महोदयः नवदेहल्यां जपान-देशस्य सासंदैः तथा तत्रत्य 'लिबरल डेमोक्रेटिक पार्टी' इत्यस्य अध्यक्षेण ताकायुकु कोबायाशी महोदयेन सह मेलनं कृतवान्। सामाजिक-माध्यमे (Social Media) एकस्मिन् सन्देशे श्रीपुरी महोदयः अवदत् यत् सः भारत-जपान रणनीतिक-सहभागितां सुदृढं कर्तुं, सुरक्षित-स्थायि-ऊर्जा-भविष्याय सहयोगं वर्धयितुं तथा च पोत-निर्माण-क्षेत्रे (shipbuilding) सहयोगस्य नूतन-मार्गाणां अन्वेषणाय चर्चां कृतवान्। श्रीपुरी महोदयः सासंदैः सह स्वस्य सद्यः कृतस्य जपान-भ्रमणस्य अनुभवान् अपि व्यययत् तथा च 1970 तमे दशके एकस्य तरुण-राजनयिकस्य रूपेण तोक्यो-नगरे स्वकार्यकालस्य स्मृतीनां उल्लेखं कृतवान्।

# भारत-सूडान देशयोः मध्ये विदेश-कार्यालय-परामर्शस्य नवमं चक्रं 'पोर्ट सूडान' मध्ये आयोजितम्

भारत-सूडान देशयोः मध्ये विदेश-कार्यालय-परामर्शस्य नवमं चक्रं **'पोर्ट सूडान'** नगरे आयोजितम्। विदेशमन्त्रालयेन विज्ञापितं यत् सभायाः अवसरे उभयपक्षौ राजनैतिक-आर्थिक-व्यापारिक-क्षमतानिर्माण-स्वास्थ्य-शिक्षासहितान् द्विपक्षीयसम्बन्धान् सुदृढं कर्तुं तथा क्षेत्रीयविषयेषु चर्चां कृतवन्तौ।

# ५१ नगरीय-निकायेषु १३९४ प्रत्याशिनः निर्वाचन-क्षेत्रे, ३२ नामाङ्कनानि निरस्तानि




**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशस्य ५१ नगरीय-निकायेषु निर्वाचनाय १३९४ अभ्यर्थिनः निर्वाचन-प्राङ्गणे सन्ति। नामाङ्कन-पत्राणां परीक्षोपार्जनस्य (Scrutiny) अनन्तरं विविध-कारणैः ३२ नामाङ्कनानि निरस्तानि (रद्द) जातानि। अधुना १३९४ अभ्यर्थिनः निर्वाचन-युद्धे अवशिष्टाः। निर्वाचनाय आहत्य १४२६ नामाङ्कन-पत्राणि पञ्जीकृतानि आसन्। नामाङ्कन-प्रत्याहरणस्य (नाम वापसी) अन्तिमा तिथिः ६ मई निर्णीता अस्ति। काङ्गड़ा-जनपदे सर्वाधिकं २६९ नामाङ्कन-पत्राणि प्राप्तानि, येषु १ निरस्तं जातं, २६८ अभ्यर्थिनः च क्षेत्रे सन्ति। मण्डी-जनपदे २१४ नामाङ्कन-पत्रेषु ९ निरस्तानि, २०५ प्रत्याशिनः च अवशिष्टाः। शिमला-जनपदे १५८ पत्रेषु ३ निरस्तानि, येन १५५ अभ्यर्थिनः निर्वाचनं लडिष्यन्ति। कुल्लू-जनपदे १२५ पत्रेषु १० नामाङ्कनानि निरस्तानि, यदा तु चम्बा-जनपदे सर्वाणि ११३ पत्राणि योग्यानि प्राप्तानि। एवमेव बिलासिपुरे ९६ पत्रेषु ३, हमीरपुरे ५५ पत्रेषु २, किन्नौर-सिरमौर-जनपदयोः ९२-९२ पत्रेषु ३-३ तथा ऊना-जनपदे १३७ पत्रेषु १ नामाङ्कनं निरस्तं जातम्। सर्वेषु जनपदेषु अन्वेषण-प्रक्रियायाः अनन्तरं अभ्यर्थिनां अन्तिमा सूची प्रायः स्पष्टा अस्ति।

## नारकण्डा-रोहडू-क्षेत्रयोः प्रथमदिने केनापि नामाङ्कनं न कृतम्

नगर-परिषद्-रोहडू तथा नगर-पञ्चायत-नारकण्डा इत्येतयोः कृते नामाङ्कन-पत्र-प्रस्तुतेः प्रथमदिवसः अपि अद्यैव आसीत्। तथापि, प्रथमदिने रोहडू-नगरस्य ४ सङ्ख्यक-वार्ड-क्षेत्रे नारकण्डा-क्षेत्रे च किमपि नामाङ्कन-पत्रं न प्राप्तम्। राज्य-निर्वाचन-आयोगस्य सचिवेन सुरजीतसिंहराठौर-महोदयेन उक्तं यत् नामाङ्कन-प्रत्याहरणस्य अनन्तरं अभ्यर्थिभ्यः निर्वाचन-चिह्नानि (Symbols) आबण्टितानि भविष्यन्ति।

# भाजपा-पक्षाय 'भाग्यशाली-तारक-प्रचारकत्वेन सिद्धाः भवन्ति सुक्खुः - जयरामठाकुरः




**हिमसंस्कृतवार्ताः - लघ्वीकाशी मण्डी।**
मुख्यमन्त्री सुक्खु-महोदयः अधुना भाजपा-पक्षाय ' भाग्यशाली-तारक-प्रचारकत्वेन सिद्धः भवति, यतः सः यत्र यत्र प्रचाराय गच्छति, तत्र काङ्ग्रेस-पक्षस्य पराजयः निश्चितः भवति। अधुना न केवलं प्रदेशः, अपितु सम्पूर्णः देशः जानाति यत् मुख्यमन्त्री सुक्खुः केवलं मिथ्यायाः (असत्यस्य) आश्रयं गृह्णाति। एताः वार्ताः मङ्गळवासरे मण्ड्यां पूर्व-मुख्यमन्त्रिणा प्रतिपक्ष-नेत्रा च जयरामठाकुरेण नगर-निगम-निर्वाचन-कार्यालयानाम् उद्घाटनानन्तरं कथिताः। तेन उक्तं यत् पश्चिमबङ्गाले यत्र मुख्यमन्त्रिणा प्रचारः कृतः, तत्र काङ्ग्रेस-प्रत्याशिनः केवलं ६५० मतानि प्राप्तानि, तस्य प्रतिभूतिः (जमानत) अपि जप्तिः जाता। 'ईवीएम' (EVM) विषये काङ्ग्रेस-पक्षम् आक्षिपन् प्रतिपक्ष-नेत्रा उक्तं यत् येन 'ईवीएम' यन्त्रेण हिमाचले काङ्ग्रेस-सर्वकारः निर्मितः, अद्य अन्येषु राज्येषु पराजये सति तस्यैव दोषारोपणं क्रियते। काङ्ग्रेस-पक्षस्य एषा रीतिः जाता यत् यदि जयः भवेत् तर्हि सम्यक्, यदि पराजयः भवेत् तर्हि दोषः 'ईवीएम' उपरि क्षिपन्तु। जयरामेण उक्तं यत् देशे 'ईवीएम' माध्यमेन निर्वाचनानि पूर्ण-पारदर्शितया सम्पन्नानि अभवन्।

### अधिकारिणां विरुद्धं कार्यविधि-स्थाने सर्वकारः तेभ्यः पारितोषिकं पदोन्नतिं च यच्छति

जयरामठाकुरेण आरक्षक-भर्ती-प्रश्नपत्र-गोपन (Paper Leak) प्रकरणस्य उल्लेखं कुर्वन् आरोपः कृतः यत् सीबीआई (CBI) संस्थायाः प्रतिवेदने (Report) आगते सत्यपि, दोषी-अधिकारिणां विरुद्धं कार्यविधि-स्थाने सर्वकारः तेभ्यः पारितोषिकं पदोन्नतिं च यच्छति। तेन प्रश्नः पृष्टः यत् मुख्यमन्त्रिणः का ईदृशी विवशता अस्ति यत् सः अनुचित-कार्यं कुर्वतः जनान् रक्षति। पूर्व-मुख्यमन्त्रिणा उक्तं यत् "मम काले यदा प्रश्नपत्र-गोपनस्य वार्ता सम्मुखम् आगता, मया तत्कालं परीक्षा निरस्ता कृत्वा प्रकरणं 'सीबीआई' संस्थायाः कृते दत्तम्। २०२४ तमे वर्षे 'सीबीआई' प्रतिवेदनं प्राप्तम् अस्ति, यस्मिन् कार्यविधि-अनुशंसा कृता, किन्तु सर्वकारः प्रतिवेदनं सार्वजनिकं कर्तुं साहसं न करोति।"

# जिला-निर्वाचन-अधिकारिभिः मतदातृ-सूच्यः प्रसारिताः, 'ऑनलाइन' माध्यमेन अपि द्रष्टुं शक्ष्यन्ति




हिमसंस्कृतवार्ताः - कार्यालयीयः प्रतिनिधिः।जिला-निर्वाचन-अधिकारिभिः पञ्चायतानां मतदातृ-सूच्यः प्रसारिताः, येन निर्वाचन-प्रक्रियायाः पारदर्शितायै सुव्यवस्थायै च महत्त्वपूर्णः पदक्षेपः स्वीकृतः। जनाः 'ऑनलाइन' (Online) माध्यमेन सूच्येषु स्वनामानि द्रष्टुं शक्ष्यन्ति। सूच्यः प्रसारात् परं अधुना राजनैतिक-दलानि प्रत्याशिनः च स्व-स्तरे रणनीतिं निर्मातुं रताः सन्ति। अस्मिन् अन्तराले राज्य-निर्वाचन-आयोगेन निर्वाचन-आचारसंहितायाः पालनाय कठोराः निर्देशः निर्गताः।
सम्बद्ध-आरक्षक-केन्द्रेषु सभानां उपवेशनानां च सूचना दानं अनिवार्यम्
राज्य-निर्वाचन-आयोगेन सर्वेभ्यः राजनैतिक-दलेभ्यः कस्यापि प्रकारस्य सभानां, उपवेशनानां च आयोजनात् पूर्वं सम्बद्ध-आरक्षक-प्रशासनाय (Police Administration) अस्य सूचना दानं अनिवार्यं कृतम्। अस्य उद्देश्यं विधि-व्यवस्थायाः रक्षणं कस्यापि अव्यवस्थायाः रोधनं च अस्ति। निर्देशेषु एतत् अपि उक्तं यत् निर्वाचन-प्रक्रियायां निष्पक्षता पारदर्शिता च सर्वेषां उत्तरदायित्वं वर्तते। प्रशासनेन एतेषां नियमानां उल्लङ्घने कठोर-दण्डस्य सचेतना दत्ता।

### मुख्यालयं विहाय न गमिष्यन्ति कर्मचारिणः

आयोगेन सर्लकारीय-कर्मचारिभ्यः अपि स्पष्टाः निर्देशाः दत्ताः यत् निर्वाचन-प्रक्रियायाः समये अनुमतिं विना ते मुख्यालयं न त्यक्ष्यन्ति। एषा व्यवस्था निर्वाचन-कार्ये नियुक्तानां कर्मचारिणां उपलब्धतां सुनिश्चितं कर्तुं कृता अस्ति। एतेन सह, सर्वकारीय-कर्मचारिणां गृहेषु कस्यापि प्रकारस्य राजनैतिक-सभायाः उपवेशनस्य वा आयोजने पूर्णतया प्रतिबन्धः कृतः अस्ति।

# जनगणना-२०२७ निमित्तं 'क्षेत्रप्रशिक्षक' जनानां त्रिदिवसीय-प्रशिक्षण-कार्यक्रमः आरब्धः, अधिकारिभ्यः तकनीकी-निर्देशाः दत्ताः

हिमसंस्कृतवार्ताः - सोलनम्।
सोलन-मण्डलस्य उपायुक्तेन मनमोहन-शर्मणा उक्तं यत् जनगणना-कार्यं त्रुटिरहितं कर्तुं प्रशिक्षण-कार्यक्रमाः महत्त्वपूर्णां भूमिकां निर्वहन्ति। मनमोहन-शर्मा अत्र 'जनगणना-२०२७' इत्यस्य कृते आयोजितस्य त्रिदिवसीय-प्रशिक्षण-कार्यक्रमस्य अध्यक्षतां कुर्वन् आसीत्। मनमोहन-शर्मणा जनगणना-२०२७ निमित्तं सोलन-मण्डले नियुक्तेभ्यः ३८ क्षेत्र-प्रशिक्षकेभ्यः (फील्ड-ट्रेनर) जनेभ्यः तकनीकी-व्यावहारिक-पक्षेषु विस्तृता सूचना आवश्यकाः निर्देशाः च दत्ताः। तेन उक्तं यत् सर्वे प्रशिक्षकाः एतं त्रिदिवसीय-प्रशिक्षणं सम्यक् अवगच्छन्तु येन जनगणना-काले कापि काठिन्यं न भवेत्। उपायुक्तेन स्पष्टीकृतं यत् जनगणना-सम्बद्धा सूचना पूर्णतया गोपनीया रक्षिष्यते। सः मण्डलवासिनः प्रार्थितवान् यत् जनगणना-अधिकारिभ्यः स्वकीयां सत्यां पूर्णां च सूचनां दत्त्वा सहयोगं कुर्वन्तु, येन कार्यं सटीकं भवेत्। तेन अधिकारिणः निष्ठापूर्वकं प्रामाणिकतया च एतत् कार्यं कर्तुं समाहूताः।
उपायुक्तेन उक्तं यत् जनगणना-२०२७ मध्ये प्रथमवारं 'स्व-गणना-पद्धतिः' (Self-enumeration) प्रारभ्यते। अस्यां प्रगतौ जनःस्वयं'वेब-पोर्टल' www.census.gov.in@se माध्यमेन स्वविवरणं प्रदातुं शक्नोति। अस्मिन् शिबिरे राजकीय-महाविद्यालय-नालागढ़स्य 'मास्टर-ट्रेनर' डॉ. नरेशः तथा राजकीय-महाविद्यालय-सोलनस्य रूपा-कैथ-महोदया च प्रशिक्षणं दत्तवन्तौ। अस्मिन् अवसरे अतिरिक्त-उपायुक्तः एवं जनगणना-नोडल-अधिकारी राहुल-जैनः, प्रभारी कोमल-गर्गः, प्रियंका-भारद्वाजः च उपस्थिताः आसन्।



# एतदेव कारणं यत् संस्कृतभाषा उपेक्षायाः कारणभूताः शनैः शनैः पतनमार्गे गच्छति।



✍पण्डित नागेन्द्रकुमारपाण्डेयः,(पटना बिहार)

मानवसभ्यतायाः इतिहासे भारतं सर्वथा समृद्धदेशः आसीत्। सभ्यतायाः विषये, संस्कृतेः विषये, विकासस्य अन्येषां धाराणां विषये च भारतं अत्यन्तं विकसितदेशरूपेण प्रसिद्धम्। भारतं जगतः अद्वितीयः देशः अस्ति, यत्र सर्वेषां धर्माणां अनुयायिनः स्वकीयया व्यक्तिगतस्वतन्त्रतया जीवनं यापयन्ति।

आधुनिके भारतसंघे प्रायः पञ्चशतानि पञ्चाशच्चाधिकानि राज्यानि, प्रान्ताः, रियासताः वा आसन्। तेषां सर्वेषां स्वकीयाः भाषाः आसन्। किन्तु तस्मिन् काले संस्कृतभाषा सर्वाधिकप्रतिष्ठिता आसीत्। राजकवयः, राजानः, मन्त्रिणश्च संस्कृतभाषाम् अवदन्। एतेषु राज्येषु बौद्ध-, जैन-, सनातन-, शैव-, वैष्णव-, भागवत-सम्प्रदायाः प्रमुखाः आसन्।

आधुनिके स्वतन्त्रभारते अनुमानतः १६८४ अधिकाः भाषाः भाष्यन्ते। संविधानानुसारं द्वाविंशतिः भाषाः मान्यतां प्राप्ताः, तासु संस्कृतभाषा अपि अस्ति।

अस्मिन् लेखे अहं संस्कृतभाषायाः विकासं पतनं च विवेचयामि। संस्कृतभाषा जगतः प्राचीनतमासु भाषासु एका समृद्धभाषा अस्ति। किन्तु स्वातन्त्र्योत्तरकाले संस्कृतस्य यथा पतनं जातम्, तत् आश्चर्यजनकम्। अनेकैः साहित्यस्रोतसः ज्ञायते यत् संस्कृतस्य विकासः सप्तसिन्धुप्रदेशे—सिन्धु, राजस्थान, पंजाब, हरियाणा, आधुनिकपाकिस्तानस्य खैबरपख्तून्वा-प्रदेशस्य स्वात्-जनपदे—अभवत्। अन्ये जैन-बौद्धग्रन्थाः वदन्ति यत् संस्कृतस्य विकासः सीरिया-मिश्रदेशयोः जातः। एतत् विवादस्य विषयः अस्ति, किन्तु संस्कृतभाषायाः प्राचीनः इतिहासः अत्यन्तं गौरवपूर्णः अस्ति।

केचन इतिहासकाराः मन्यन्ते यत् संस्कृतस्य कालक्रमः १५०० ईसापूर्वात् ५०० ईसापूर्वपर्यन्तम्। संस्कृतविद्वांसः तु वदन्ति यत् संस्कृतभाषायाः विकासः त्रिषु चरणेषु अभवत्—

प्राचीनवैदिककालः (६००–८०० ईसापूर्वम्)अस्मिन् काले वेदाः, पुराणानि, महाभारतम्, रामायणम्, उपनिषदः च रचितानि।

**मध्यकालः (८०० ईसापूर्वात् १००० ईस्वीपर्यन्तम्)**

अस्मिन् काले संस्कृतस्य गद्यपद्यसाहित्यस्य महान् विकासः अभवत्। रघुवंशम्, मेघदूतम्, अभिज्ञानशाकुन्तलम्, मालविकाग्निमित्रम् इत्यादयः ग्रन्थाः रचिताः। कल्हणस्य राजतरङ्गिणी अपि अस्मिन् काले प्रसिद्धा अभवत्।

**आधुनिकसंस्कृतकालः (१००० ईस्वीतः २०२५ पर्यन्तम्)**

अस्मिन् काले उत्तररामचरितम्, विक्रमोर्वशीयम्, मुद्राराक्षसम् इत्यादयः बहवः ग्रन्थाः रचिताः।

संस्कृतभाषायाः प्रमुखवाक्यानि—“वसुधैव कुटुम्बकम्”, “सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः” इत्यादीनि। एतेषु वाक्येषु विश्वबन्धुत्वस्य सन्देशः दृश्यते।

बौद्धधर्मे अपि “बुद्धं शरणं गच्छामि” इति वाक्यं प्रसिद्धम्। जैनसम्प्रदायस्य भगवतीसूत्रम् इत्यादयः ग्रन्थाः अपि संस्कृते रचिताः।

## संस्कृतभाषायाः पतनस्य कारणानि

संस्कृतभाषा देववाणी इति प्रसिद्धा। हिन्दुधर्मस्य, बौद्धधर्मस्य, जैनधर्मस्य च अनेकाः धार्मिकग्रन्थाः अस्यां भाषायां सुरक्षिताः सन्ति। प्रथमं कारणम्—११९२ ईस्वी संवत्सरे तराइनद्वितीययुद्धे पृथ्वीराजचौहानस्य पराजयानन्तरं दिल्लीप्रदेशे सल्तनत्-शासनस्य स्थापना अभवत्। ततः परं अनेकानि राज्यानि मुस्लिमसुल्तानानां आधिपत्ये आगतानि। तैः संस्कृतभाषा उपेक्षिता, अरबी-तुर्कीभाषे राजकार्येषु स्वीकृते।ततः १५२६ ईस्वी संवत्सरे बाबरेण मुगलसाम्राज्यस्य स्थापना कृता। मुगलाः फारसीभाषां राजभाषारूपेण स्वीकृतवन्तः। एवं संस्कृतभाषा पुनः उपेक्षिता अभवत्।१७५७ संवत्सरे प्लासी-युद्धे अङ्ग्रेजानां विजयः अभवत्। तैः आङ्ग्लभाषा प्रतिष्ठापिता। १८३५ संवत्सरे English Education Act इति अधिनियमेन संस्कृताय पुनः आघातः जातः।

तथापि संस्कृतोन्नत्यर्थं केचन प्रयासाः अपि अभवन्। १७९१ संवत्सरे राजस्थानप्रदेशे संस्कृतविद्यालयानां, महाविद्यालयानां, विश्वविद्यालयानां च स्थापना कृता।अन्यत् कारणम्—संस्कृतभाषा व्यवसायस्य भाषा न कृता, न च अर्थोपार्जनेन सह योजिता।

स्वातन्त्र्योत्तरकाले १९६८ राष्ट्रीयशिक्षानीत्यां त्रिभाषासूत्रं स्वीकृतम्—हिन्दी, आङ्ग्लभाषा, क्षेत्रीयभाषा च। तृतीयभाषारूपेण छात्रैः प्रायः स्वभाषाः स्वीकृताः, संस्कृतं तु केवलं अधिकाङ्कप्राप्तये विषयः अभवत्।

अद्य संस्कृताध्यापनं प्रायः हिन्दी-आङ्ग्ल-क्षेत्रीयभाषाभिः क्रियते, यतः संस्कृतशिक्षकाणां घोराभावः अस्ति। २०१९ संवत्सरे भारतसरकारेण उक्तं यत् २५,००० संस्कृतशिक्षकाः अपेक्षिताः।

भारतस्य जनसंख्या १४० कोट्यधिकाः अस्ति, किन्तु संस्कृतभाषां केवलं अल्पसंख्या एव वदति। एषा भारतस्य महती विडम्बना अस्ति।भारतदेशे संस्कृतभाषां कतिपयैः ब्राह्मणानां भाषा इति मन्यन्ते, अतः सा उपेक्षिता। ब्राह्मणसमाजेन अपि प्रचारप्रसाराय पर्याप्ताः प्रयासाः न कृताः।किन्तु अमेरिका, जर्मनी, सूरीनाम, फिजी, इङ्ग्लैण्ड, ऑस्ट्रेलिया, इटली इत्यादिषु देशेषु अद्यापि संस्कृतविषये अनुसन्धानं प्रवर्तते। संस्कृतं सुगमशिक्षणीयभाषा अस्ति। वैज्ञानिकाः अपि मन्यन्ते यत् संस्कृतं वैज्ञानिकभाषा अस्ति, या सङ्गणकैः सह अपि संप्रेषणे उपयोगी भवितुम् अर्हति।

## "वन्दे संस्कृतमातरम्"
## "लौकिकन्यायकोशः"
## "अग्र्यानन्यायः"

अग्रिम् आहार इति कोऽपि वदति चेत् कस्मिन् अपि पात्रे अग्रिम् आहर इति वक्तव्यं न भवति। यः अग्रिम् आनयति सः योग्य पात्रं अन्विष्य तस्मिन् अग्निं स्थापयित्वा एव आनयति। एषा अपेक्षा आदेशस्य दातुः पालयितुः च भवति। एवम् आधारं विना आधेयं स्थातुं न प्रभवति इति द्योतयितुम् अस्य न्यायस्य प्रयोगः भवति।

**डा वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**



हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्ता-संवादः

**नन्दिनी:** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्याः** नमस्ते नन्दिनि। का अस्ति अद्यतनी प्रथमा विचित्रा वार्ता?

**नन्दिनी:** एकस्मिन् विवाहे पण्य-प्रेषकाय मूल्य-रूपेण मुद्रामाला दत्ता। तेन प्रेषकेण महती प्रसन्नता अनुभूता।

**काव्याः** एतत् तु हास्यकरम्। सः पुरुषः धनवान् जातः। अन्यत् शृणु, कोलम्बिया-देशस्य अशीतिं जलहस्तिनः भारतं प्रति आनेतुं वनतारा-संस्थया निश्चयः कृतः।

**नन्दिनी:** विशालकायानां पशूनां सुदीर्घं प्रवासं चिन्तयित्वा अहम् आश्चर्यं प्राप्तवती अस्मि। पशूनां विषये अपरा वार्ता अस्ति- रेलयान-चालकेन मार्गे स्थितां महिषीं रक्षितुं शीघ्रं यानं स्थगितम्।

**काव्याः** तस्य चालकस्य कारुण्यं प्रशंसनीयम्। अन्ते, बेङ्गलूरु-नगरे एकेन तन्त्रज्ञेन उक्तं यत् एकाकिवासः कार्य-सिद्ध्यै वरदानम् इति।

**नन्दिनी:** सत्यम्, एकान्तता चिन्तनशक्तिं वर्धयति। धन्यवादः काव्ये।

## तमिलनाडु-राज्ये 'टी.वी.के.' (TVK) पक्षस्य सर्वकार-निर्माणस्य सज्जता; विजयः सप्तम-दिनाङ्के मुख्यमन्त्रीरूपेण शपथं ग्रहीष्यति

तमिलनाडु-विधानसभा-निर्वाचनस्य परिणामेषु अभिनेतुः राजनेता जातः विजय-थलपति महोदयस्य 'तमिलगा वेट्री कजगम' (TVK) पक्षः बहुमतस्य 118 अङ्कतः न्यून-आसनेषु सत्यपि सर्वकार-निर्माणस्य सज्जतायां संलग्ना अस्ति। मङ्गलवासरे आयोजितायां टी.वी.के. पक्षस्य नवनिर्वाचित-विधायकानां सभायां विजयः सर्वसम्मत्या स्वनेता चितः। अनया घोषणया सह तस्य मुख्यमन्त्री-भवनस्य मार्गः पूर्णतया प्रशस्तः जातः। सूत्रानुसारं, विजयः 'मई' मासस्य सप्तम-दिनाङ्के (७ मई) तमिलनाडु-राज्यस्य नूतन-मुख्यमन्त्रीरूपेण शपथं ग्रहीतुं शक्नोति। विजयस्य दलेन स्वस्य प्रथमे एव निर्वाचने ऐतिहासिकं प्रदर्शनं कुर्वता 108 आसनानि जितानि। यद्यपि, बहुमताय आवश्यक-अङ्कतः (118) दलम् अधुनापि 10 आसनं दूरे वर्तते।गठबन्धनस्य प्रयासःअस्मिन् अन्तराले, बहुमतस्य आवश्यक-संख्यां प्राप्तुं टी.वी.के. पक्षस्य मुख्य-दलेन (core team) 'द्रविड़ मुनेत्र कषगम' (DMK) गठबन्धनस्य सम्भावित-सहयोगिभिः, विशेषतः कांग्रेसेन, विदुथलाई चिरुथैगल काची (VCK) तथा च वामपन्थी-दलैः सह वार्ता आरब्धा। आङ्किक-दृष्ट्या पश्यामश्चेत्, कांग्रेस (पञ्च आसनानि), वी.सी.के. (द्वे आसने), सी.पी.आई. (द्वे आसने) तथा च सी.पी.आई.(एम) (द्वे आसने) मिलित्वा प्रायः 11 विधायकानां सुदृढं गठबन्धनं भवति, यत् विजयं बहुमत-सङ्ख्यायाः उपरि नेतुं पर्याप्तम् अस्ति।कांग्रेसाय मन्त्रिमण्डले द्वे पदे मिलितुं शक्नुतःप्रस्तावितानुसारं कांग्रेसाय मन्त्रिमण्डले द्वे विभागौ (portfolios) लब्धुं सम्भावना वर्तते, यदा तु अन्येभ्यः लघु-सहयोगि-दलेभ्यः एकैकं पदं प्रदास्यते। टी.वी.के. पक्षेण स्वसहयोगिभ्यः चतुर्णां तः षण्णां (४-६) पर्यन्तं मन्त्रि-पदानां वितरणं भवेत् इति आशा अस्ति। 'एआईएडीएमके' (AIADMK) दलस्य भूतपूर्व-वरिष्ठनेतारं के. सेंगोत्तैयान महोदयम् विहाय, विजयस्य पक्षस्य प्रायः सर्वे विजयी-प्रत्याशिनः प्रथमवारं विधायकाः जाताः सन्ति।